ष्णप्रत्ययेन साध्यम् । इति व्याकरणम् ॥ (यथा, माघे । ३ । ७६ ।
"विक्रीय दिश्यानि धनान्युरूणि
द्वैप्यानसावुत्तमलाभभाजः ।
तरीषु तत्रत्यमफल्गुभाण्डं
सांयात्रिकानावपतोऽभ्यनन्दत् ॥" )

द्वैमातुरः, पुं, ( द्वयोर्मात्रोरपत्यम् । द्विमातृ+ "मातुरुत्संख्यासंभद्रपूर्व्वायाः ।" ४ । १ । ११५। इति अण् उत्त्वञ्च । ) गणेशः । इत्यमरः । १ । १ । ४० ॥ ( अस्य द्विमातृत्वकथा स्कन्दपुराणे गणेशखण्डे उक्ता यथा,—
"आविर्भविष्ये सदने वरेण्यस्य महीपतेः ।
त्रैलोक्यरक्षणार्थाय विघ्नस्यास्य प्रशान्तये ।
पालनाय स्वभक्तानां साधुत्राणाय भूसुराः ॥
शिव उवाच ।
इत्युक्त्वा पुष्पकागर्भं प्रविवेश तदैव सः ।
आगते नवमे मासि प्रासूत पुष्पका शिशुम् ॥
चतुर्बाहुमिभास्यञ्च इन्दुरं सुन्दरेक्षणम् ।
आयुधानि च चत्वारि बिभ्रतं तेजसान्वितम् ॥
दृष्ट्वा सा क्रन्दनं चक्रेऽरिष्टमेतत् किमागतम् ।
श्रुत्वा चाक्रन्दनं तस्या वरेण्यः सगणो ययौ ॥
ददर्श बालकं सोऽपि विस्मितः स्वैस्तैर्गणैः ।
उवाच सेवकान् राजा त्यजतैनं सरोवरे ॥
शिशुमादाय ते याताः पार्श्वस्यैवाश्रमे शुभे ।
कासारे तं शिशुं त्यक्त्वा ययुः सर्वे निजं पुरम् ॥
अपरस्मिन् दिने पार्श्वमुनिः स्नानाय चागतः ।
तदैव दृदृशे तेन बालकोऽद्भुतदर्शनः ॥
आश्चर्य्यमकरोत्तत्र भयभीतस्तथाभवत् ।
आश्रमे केन मे त्यक्तमरिष्टसुखदायिनीम् ॥
तपसा नु फलं दातुमीदृशीं पुत्रवांस्तनुम् ।
रचितुं सर्व्वलोकानां परमात्मा निजेच्छया ॥
सुन्दरो बालकः केन त्यक्तोऽयमीदृशो बहिः ।
नीत्वा स्वमाश्रमं चैनं पालयिष्ये प्रयत्नतः ॥
इत्युक्त्वा जगृहे बालमालिलिङ्ग मुदा मुनिः ।
तमानीतं मुनेः पत्नी ददर्श दीपवत्सला ।
उवाच निजभर्त्तारं सुप्रसन्नाननाम्बुजा ॥
दीपवत्सलोवाच ।
किमानीतं महत् स्वामिन् भृशमाश्चर्य्यकारकम् ।
इदं वैनायकं रूपं समाभाति द्विजर्षभ ! ॥
इदमेव श्रियः स्थानं इदमेव तपःफलम् ।
इदमेव परं ब्रह्म योगिध्येयं सनातनम् ।
इदमेव परं तेज आदित्ये यदधिष्ठितम् ।
इदमेव हि वेदान्ता नेति नेति प्रचक्षते ॥
शिवउवाच ।
इत्युक्त्वा हर्षसम्पन्ना भर्तुरादाय बालकम् ।
स्तनपानं ददौ तस्मै ततः सा दीपवत्सला ।
द्वितीयाचन्द्रवद्बालो वृद्धिं यातो दिने दिने ॥")
जरासन्धः । इति मेदिनी । रे, २६८ ॥ ( अस्य द्विमातृत्वकारणं जरासन्धशब्दे द्रष्टव्यम् ॥ ) द्विमातृजे, त्रि । इति हेमचन्द्रः । ३ । २१० ॥ ( यथा, राजतरङ्गिण्याम् । ४ । ३५५ ।
"भिन्नशीला तयोर्भ्रात्रोर्यौद्वैमातुरयोः पुनः ॥")

द्वैमातृकः, पुं, ( द्वे मातृके इव यस्यासौ द्विमातृकः । स एव स्वार्थे अण् ।) नदीवृष्टिजलोद्भूतधान्यभृतो देशः । इति राजनिर्घण्टः ॥

द्वैषणीया, स्त्री, ( द्वेषणं द्वेषमर्हतीति । छः । ) नागवल्लीभेदः । इति राजनिर्घण्टः ॥

द्व्यक्षरं, क्ली, (द्वयोरक्षरयोः समाहारः ।) वर्णद्वयम् । द्वयोरक्षरम् । (द्वे अक्षरे यत्र ।) अक्षरद्वययुक्तशब्दादौ, त्रि ॥ (यथा, भागवते ।२।६।६।
"स चिन्तयन् द्व्यक्षरमेकदाम्भ-
स्युपाशृणोत् द्विर्गदितं वचो विभुः ॥" )

द्व्यङ्गुलं, त्रि, ( द्वे अङ्गुली प्रमाणमस्य । "तत्पुरुषस्याङ्गुलेरिति ।" ५ । ४ । ८६ । इति अच् ।) अङ्गुलिद्वयपरिमितम् । यथा, ज्योतिषतत्त्वे ।
"अर्काङ्गुलाथ सूच्यग्रा काष्ठी द्व्यङ्गुलमूलिका ।
शङ्कुच्छाया भवेत्तत्र तच्छायां परिकल्पयेत् ॥"
द्वयोरङ्गुल्योः समाहारः इति वाक्ये अङ्गुलिद्वयमात्रे, क्ली । इति मुग्धबोधम् ॥ (द्वे अङ्गुली यस्य इति विग्रहे । "अङ्गुलेर्दारुणि ।" ५ । ४ । ११४ । इति षच् । द्व्यङ्गुलं दारु ॥ इति व्याकरणम् ॥ )

द्व्यञ्जलं, त्रि, (द्वावञ्जली परिमाणमस्य ( "द्वित्रिभ्यामञ्जलेः ।" ५ । ४ । १०२ । इति टच् । ) अञ्जलिद्वयपरिमितम् । द्वयोरञ्जल्योः समाहारः इति वाक्ये अञ्जलिद्वयमात्रे, क्ली । इति मुग्धबोधम् ॥

द्व्यणुकं, क्ली, (द्वौ अणू कारणे यस्य । कप् ।) परमाणुसमवेतद्रव्यम् । परमाणुद्वयात्मकम् । तच्च प्रत्यक्षादिविषयम् । यथा, भाषापरिच्छेदे ।३८।
"विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः ॥"
तस्य परिमाणमनित्यम् । यथा,—
"अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ॥"
इति भाषापरिच्छेदे । ११९ ॥

द्व्यन्यः, त्रि, द्वाभ्यामन्यः इति पञ्चमीतत्पुरुषे कृते । द्विभिन्नः ॥ द्वे अन्ये यस्य । इति बहुव्रीहौ । द्विभिन्नकः । द्वयोरन्ययोः समाहारः । इति वाक्ये, क्ली ॥

द्व्यर्थः, त्रि, ( द्वौ अर्थौ यस्य । ) अर्थद्वययुक्तशब्दादिः । अस्य प्रमाणं राघवपाण्डवीयादिग्रन्थे द्रष्टव्यम् ॥

द्व्यष्टं, क्ली, ( द्वैमरूप्ये द्वे अश्नुते इति । अश+ गत्यर्थेति क्तः । इडभावः । ) ताम्रम् । इत्यमरः । २ । ६ । ६७ ॥

द्व्यहः, पुं, अहर्द्वयम् । द्वे अहनी समाहृते । इति पुंलिङ्गसंग्रहे भरतः ॥

द्व्यात्मकः, पुं, ( द्वौ रूपौ आत्मानौ यस्य । ) मिथुनकन्याधनुर्मीनराशयः । यथा, ज्योतिस्तत्त्वे ।
"चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"

द्व्याह्निकः, त्रि, ( द्व्यहे भवः । ठञ् । बाहुलकात् न वृद्धिः । ) दिनद्वयभवः । द्व्यहे भव इत्यर्थे ष्णिकप्रत्ययः ॥

---

## ध

ध, धकारः । स तवर्गचतुर्थो वर्णो व्यञ्जनीनविंशश्च । अस्योच्चारणस्थानं दन्तः । इति व्याकरणम् ॥ ( यथा, शिक्षायाम् । १७ ।
"दन्त्या ऌतुलसाः स्मृताः ।" इति ॥ ) अस्य स्वरूपं यथा,—
"धकारं परमेशानि ! कुण्डली मोक्षरूपिणी ।
आत्मादितत्त्वसंयुक्तं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं देवि ! त्रिशक्तिसहितं सदा ।
त्रिबिन्दुसहितं वर्णं धकारं हृदि भावय ॥
पीतविद्युल्लताकारं चतुर्व्वर्गप्रदायकम् ॥"
इति कामधेनुतन्त्रम् ॥
"त्रिकोणरूपरेखायां त्रयो देवा वसन्ति च ।
विश्वेश्वरी विश्वमाता वामतः स्कन्धतः स्थिता ॥"
इति वर्णोद्धारतन्त्रम् ॥
अस्य ध्यानं यथा,—
"षड्भुजां मेघवर्णाञ्च रक्ताम्बरधरां पराम् ।
वरदां शोभनां रम्यां चतुर्व्वर्गप्रदायिनीम् ॥
एवं ध्यात्वा धकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
अस्य नामानि यथा—
"धो धनार्थो रुचिः स्थाणुः सात्वतो योगिनीप्रियः ।
मीनेशः शङ्खिनी तोयं नागेशो विश्वपावनी ॥
धिषणा धरणा चिन्ता नेत्रयुग्मं प्रियो मतिः ।
पीतवासा त्रिवर्णा च धाता धर्म्मश्च वङ्गः ॥
सन्दर्शो मोहनी लज्जा वक्रतुण्डाधरं धरा ।
वामपादाङ्गुलेर्मूलं ज्येष्ठा सुरगुरुं भवः ॥
स्वर्णात्मा दीर्घजङ्घा च धनेशो धनसञ्चयः ॥"
इति नानातन्त्रशास्त्रम् ॥

धं, क्ली, (दधाति सुखमिति । धा+डः ।) धनम् । इति मेदिनी । धे, १ ॥

धः, पुं, ( दधाति धरति विश्वमिति । धा+डः । ) ब्रह्मा । (दधाति निधिमिति ।) कुवेरः । (दधाति जीवानां शुभाशुभमिति । ) धर्म्मः । इति मेदिनी । धे, १ ॥

धक, क नाशने । इति कविकल्पद्रुमः ॥ ( चुरां-परं-सकं-सेट् । ) कोपधः । नाशनं नष्टीकरणम् । क, धकयति पापं गङ्गा । इति दुर्गादासः ॥

धटः, पुं, (धं धनं अटति गच्छति प्राप्नोति तौल्यत्वेनेति । ध+अट्+अच् । शकन्ध्वादित्वात् साधुः । ) तुला । इत्यमरः । ३ । ५ । १७ ॥ तराजु इति धाड़ा इति च भाषा । ("एतन्निरुक्तिर्यथा,—
"धकाराद्धर्म्ममुद्दिष्टं टकारात् कुटिलं नरम् ।
धृतौ धारयसे यस्माद्धटस्तेनाभिधीयते ॥"
इति दिव्यतत्त्वधृतवचनम् ॥)
तुलाराशिः । यथा, ज्योतिस्तत्त्वे ।
"सिंहो वृषश्च मेषश्च कन्या धन्वी घटो धटः ।
अर्कादीनां त्रिकोणानि मूलानि राशयः
क्रमात् ॥"
तुलापरीक्षा । इति परीक्षातत्त्वम् ॥